# Shri Mangalashloka Ramayanam

# શ્રીમઙ્ગલશ્લોકરામાયણમ્

## Document Information

Text title : Shri Mangalashloka Ramayanam

File name : mangalashlokarAmAyaNam.itx

Category : raama, mangala

Location : doc_raama

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : From stotrArNavaH

Latest update : September 12, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 12, 2020

*sanskritdocuments.org*

Shri Mangalashloka Ramayanam

# શ્રીમઙ્ગલશ્લોકરામાયણમ્

સર્વલોકશરણ્યાય સાકેતપુરવાસિને ।
સત્સેવિતાય રામાય સસીતાયાસ્તુ મઙ્ગલમ્ ॥ ૧॥

કૌસલ્યાયાં દશરથાજ્જાતાય પરમાત્મને ।
સદા ભરતસૌમિત્રિશત્રુઘ્નેશાય મઙ્ગલમ્ ॥ ૨॥

કૌશિકક્રતુરક્ષાર્થં કૃત્વા મારીચમર્દનમ્ ।
અહલ્યાપાપનાશાય રઘુનાથાય મઙ્ગલમ્ ॥ ૩॥

જિત્વા (ભઙ્ક્ત્વા) શૈવં પુરા ચાપં પ્રાપ્ય સીતામનુત્તમામ્ ।
અયોધ્યામાગતાયાસ્તુ ગુણપૂર્ણાય મઙ્ગલમ્ ॥ ૪॥

પિતુઃ સત્યપ્રતિજ્ઞાયૈ કૈકેય્યા વચનાદપિ ।
ચિત્રકૂટનિવાસાય સીતારામાય મઙ્ગલમ્ ॥ ૫॥

પાદુકે ભરતે યાતે દત્ત્વા રાજ્યસ્ય પાલને ।
દણ્ડકારણ્યવાસાય ધૈર્યયુક્તાય મઙ્ગલમ્ ॥ ૬॥

હત્વા વિરાધં બલિનં મુનીનાં ભાવિતાત્મનામ્ ।
દત્તાભયાય રામાય પદ્માક્ષાયાસ્તુ મઙ્ગલમ્ ॥ ૭॥

ચતુર્દશસહસ્રાણાં રક્ષસાં ક્રૂરકર્મણામ્ ।
ખરદૂષણમુખ્યાનાં હારિણેઽસ્તુ સુમઙ્ગલમ્ ॥ ૮॥

સીતાદર્શનયુક્તાય ગૃધ્રમોક્ષપ્રકાશિને ।
કબન્ધહારિણે તસ્મૈ રાઘવાયાસ્તુ મઙ્ગલમ્ ॥ ૯॥

શબર્યા દત્તપૂજાય સેવિતાય હનૂમતા ।
સુગ્રીવકૃતસખ્યાય ધૈર્યયુક્તાય મઙ્ગલમ્ ॥ ૧૦॥

વાલિનં બલિનં હત્વા સુગ્રીવમભિષિચ્ય ચ ।
વર્ષરાત્રનિવાસાય રામચન્દ્રાય મઙ્ગલમ્ ॥ ૧૧॥

કાલાતિક્રમણાચ્ચૈવ કુપિતાય મહાત્મને ।
આગતે સતિ સુગ્રીવે પ્રસન્નાયાસ્તુ મઙ્ગલમ્ ॥ ૧૨॥

અઙ્ગુલીયપ્રદાત્રે ચ હનૂમતિ મહાત્મને ।
સીતાં દૃષ્ટ્વાગતે તસ્મિન્ હર્ષયુક્તાય મઙ્ગલમ્ ॥ ૧૩॥

અશોકવનિકામધ્યે શ્રુત્વા સીતાં હનૂમતા ।
સુગ્રીવકૃતયાનાય રઘુનાથાય મઙ્ગલમ્ ॥ ૧૪॥

અથાગતં મહાત્માનમભિષિચ્ય વિભીષણમ્ ।
કૃતસાગરબન્ધાય સાનુજાયાસ્તુ મઙ્ગલમ્ ॥ ૧૫॥

સેતુના સુખમાસાદ્ય લઙ્કાં રાવણપાલિતામ્ ।
સુવેલગિરિવાસાય રણધીરાય મઙ્ગલમ્ ॥ ૧૬॥

સુગ્રીવેણ દશગ્રીવે મુષ્ટિયુદ્ધેન મૂર્છિતે ।
ઇન્દ્રજિન્નાગબદ્ધાય વિમુક્તાયાસ્તુ મઙ્ગલમ્ ॥ ૧૭॥

ધૂમ્રાક્ષે વાયુપુત્રેણ વજ્રદંષ્ટ્રેઽઙ્ગદેન ચ ।
પ્રહસ્તે નીલનિહતે હર્ષયુક્તાય મઙ્ગલમ્ ॥ ૧૮॥

નયત્યૌષધિશૈલેન્દ્રં હનૂમતિ મહાત્મને ।
બ્રહ્માસ્ત્રબન્ધયુક્તાય વિમુક્તાયાસ્તુ મઙ્ગલમ્ ॥ ૧૯॥

રાવણિં ચ હતં શ્રુત્વા લક્ષ્મણેન મહાબલમ્ ।
નિહત્ય મકરાક્ષં ચ પ્રસન્નાયાસ્તુ મઙ્ગલમ્ ॥ ૨૦॥

જિત્વા રાવણકોટીરં કુમ્ભકર્ણં નિહત્ય ચ ।
અતિકાયં હતં શ્રુત્વા પ્રીતિયુક્તાય મઙ્ગલમ્ ॥ ૨૧॥

તતો મૂલબલં હત્વા રાવણં ચ મહાબલાત્ ।
વિજયં પ્રાપ્ય હૃષ્ટાય રઘુનાથાય મઙ્ગલમ્ ॥ ૨૨॥

તતોઽગ્નિવચનાત્ સીતાં પ્રાપ્ય હૃષ્ટાં યશસ્વિનીમ્ ।
બ્રહ્મસ્તુત્યા પ્રહૃષ્ટાય રામભદ્રાય મઙ્ગલમ્ ॥ ૨૩॥

વિભીષણં મહાત્માનં લઙ્કાયામભિષિચ્ય ચ ।
વાનરૈ રાક્ષસૈઃ સાર્ધં પુષ્પકસ્થાય મઙ્ગલમ્ ॥ ૨૪॥

મદનાકૃતયે તસ્મૈ મધુરાપુરવાસિને ।
મનુવંશપ્રદીપાય માનવેન્દ્રાય મઙ્ગલમ્ ॥ ૨૫॥

પ્રાપ્યાયોધ્યાં ચ ભરતં ગઙ્ગાતોયૈઃ સુગન્ધિભિઃ ।
અભિષિક્તાય રામાય સસીતાયાસ્તુ મઙ્ગલમ્ ॥ ૨૬॥

મધુરાપુરવાસાય વસુદેવસુતપ્રભુઃ (?) ।
શ્રીરામમઙ્ગલં નિત્યં શ‍ૃણ્વતાં સુકૃતં ભવેત્ ॥ ૨૭॥

એવં વાલ્મીકિના પ્રોક્તં રામાયણકથામૃતમ્ ।
યઃ પઠેદ્રામચરિતં સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૨૮॥

અપુત્રાઃ પુત્રિણઃ સન્તુ પુત્રિણઃ સન્તુ પૌત્રિણઃ ।
અધનાઃ સધનાઃ સન્તુ જીવન્તુ શરદાં શતમ્ ॥ ૨૯॥

ઇતિ શ્રીમઙ્ગલશ્લોકરામાયણં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shri Mangalashloka Ramayanam*
pdf was typeset on September 12, 2020

Please send corrections to *sanskrit@cheerful.com*